मूषककर्णी, स्त्री, (मूषिकस्य कर्णवत् पत्राण्यस्याः । ङीष् ।) आखुकर्णी । इति राजनिघण्टः ॥

मूषकमारी, स्त्री, ( मूषकं उन्दुरं मारयतीति । मृ+णिच्+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ङीष् ।) सुतश्रेणीवृक्षः । इति राजनिर्घण्टः ॥

मूषका, स्त्री, ( मूषक+स्त्रियां टाप् । क्षिपकादित्वात् न अत इत्वम् ।) मूषिका । इति शब्दरत्नावली ॥

मूषकारातिः पुं, (मूषकाणां अरातिः घातकः । ) बिड़ालः । इति राजनिर्घण्टः ॥ मूषिकारातिः । इति च पाठः ॥

मूषा, स्त्री, ( मूषति रत्नादीनीति । मूष+कः+स्त्रियां टाप् । ) स्वर्णाद्यावर्त्तनपात्रम् । मूची इति भाषा ॥ (यथा, पञ्चदश्याम् । ४ । २ ।
"मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥")
तत्पर्य्यायः । तैजसावर्त्तनी २ । इत्यमरः । २ । १० । ३३ ॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६ । इति भरतः ॥
"इष्टाङ्के तुषैः पूर्णो मध्ये मूषां निधापयेत् ।
चिपुटाग्निं मुद्रयेद्गाढं तद्गाढं पुटमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) मूषिका ७ । इति रमानाथः ॥ देवताड़कः । इति शब्दचन्द्रिका ॥ मूषिकस्त्रीजातिः । इति शब्दरत्नावली ॥ गवाक्षः । यथा,—
"एकविंशाद्यिमूषावदनमितिमहो ब्रूहि मे भूमिभर्त्तु-
र्व्वैरी दृष्टिश्छमये चतुरविरचिते प्रत्यग्रशाला-
विश्रामे ।"
इत्यादि लीलावत्यां श्रेढ़ीव्यवहारः ॥

मूषाकर्णी, स्त्री, (मूषायाः कर्णा इव पत्राण्यस्याः ।) आखुकर्णी । इति शब्दरत्नावली ॥

मूषातुत्थं, क्ली, ( मूषाजातं तुत्थम् । ) नील-तुत्थम् । तत्पर्य्यायः । कांस्यनीलम् २ हेम-तुत्थम् ३ शिखिग्रीवम् ४ । इति हेमचन्द्रः । ४ । ११८ ॥

मूषिकः, पुं, ( मुष्णाति धान्यादीनीति । मुष्+"मुषिर्दीर्घश्च ।" उणा० २ । ४२ । इति किकन् दीर्घश्च । ) जन्तुविशेषः । इन्दुर इति भाषा ॥ ( यथा, हितोपदेशे मित्रलाभप्रकरणे । १३१ ।
"धनेन बलवान् लोको धनाद्भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतः ॥")
तत्पर्य्यायः । उन्दुरः २ आखुः ३ । इत्यमरः । २ । ५ । १२ ॥ मूषः ४ मूषीकः ५ उन्दूरः ६ वभ्रुः ७ वृषः ८ खानिकः ९ वृषः १० । इति शब्दरत्नावली ॥ मूषकः ११ गिरिः १२ उन्दु-रुकः १३ नखी १४ खनकः १५ बिलकारी १६ धान्यारिः १७ बहुप्रजः १८ । अस्य मांस-गुणाः ।
"अहिनकुलमार्ज्जारगोधामूषकसुसुखा विलेशयाः कथिताः ।
अवानिलकाशहरं तन्मांसं पित्तदाहकरम् ॥
अन्ये विलेशया ये स्युः केल्हिड़ोन्दुरुकादयः ।
गर्हितं तस्य मांसञ्च मद्यगौरवदुर्ज्जरम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"मूषिको मधुरः स्निग्धो व्यवायी बलवर्द्धनः ।"
इति राजवल्लभः ॥ *॥
पारिभाषिकमूषिको यथा,—
"विभवे सति नैवात्ति न ददाति जुहोति च ।
तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति ॥"
इति मार्कण्डेयपुराणे आचाराध्यायः ॥
(जनपदविशेषः । यथा, महाभारते । ६ । ९ । ५८ ।
"द्रविड़ाः केरलाः प्राच्या मूषिका वन-
वासिकाः ॥")

मूषिकपर्णी, स्त्री, ( मूषिककर्णवत् पर्णानि यस्याः ।) जलजवृक्षविशेषः । इँदुरकाणीपाना इति भाषा । (यथा, चरके विमानस्थाने सप्तमेऽध्याये ।
"मूषिकपर्णीं समूलाग्रप्रतानामपहृत्य ।" )
तत्पर्य्यायः । चित्रा २ उपचित्रा ३ न्यग्रोधी ४ द्रवन्ती ५ शम्बरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रण्डा १० । इत्यमरः । २ । ४ । ८८ ॥ पुत्त्रश्रेणी ११ आखुपर्णिका १२ वृषपर्णी १३ आखुपर्णी १४ मूषिका १५ पञ्चिपत्रिका १६ । इति रत्नमाला ॥ मूषिपर्णिका १७ चपिटा १८ मूषीकपर्णी १९ सुकर्णिका २० । इति शब्द-रत्नावली ॥

मूषिका, स्त्री, (मूषिक+अजादित्वात् टाबित्युज्ज्वलदत्तः ।) मूषिकपर्णी । इति रत्नमाला ॥ उन्दुरः । इति शब्दरत्नावली ॥ मूषा । इत्य-मरटीकायां रमानाथः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"चोरं महापञ्चमूलं मूषिकां चाग्रवर्ज्जि-
ताम् ।")

मूषिकाङ्कः, पुं, ( मूषिकः उन्दुरवाहनत्वेन अङ्कः चिह्नमस्य । ) गणेशः । इति जटाधरः ॥

मूषिकाञ्चनः, पुं, ( मूषिकं अञ्चति स्ववाहनतया प्राप्नोतीति । अनृच्+ल्युः । ) गणेशः । इति त्रिकाण्डशेषः ॥

मूषिकारातिः, पुं,(मूषिकाणांमरातिः ।) बिड़ालः । इति राजनिर्घण्टः ॥

मूषिकाह्वयः, पुं, (मूषिकस्य आह्वा आह्वा आख्या यस्य ।) मूषिकपर्णी । इति जटाधरः ॥ (तथास्य पर्य्यायः ।
"दन्तुदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः ।
द्रवन्तीनामतश्चित्रा न्यग्रोधा मूषिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

मूषिपर्णिका, स्त्री, ( मूषिपर्ण+कन् टाप् अत इत्वम् । ) मूषिकपर्णी । इति शब्दरत्नावली ॥

मूषी, स्त्री, ( मूष्+कः । स्त्रियां ङीष् । मूषा । स्वर्णाद्यावर्त्तनभाजनम् । इत्यमरटीकायां भरतः ॥ महामूषिकः । यथा,—
"अन्यो महामूषिकः स्यान्मूषी विघ्नेशवाहनः ।
महाङ्गः शस्यमारी च भूफली भित्तिपातनः ।"
इति राजनिर्घण्टः ॥

मूषीकः, पुं, स्त्री, (मोषति इति । मूष+बाहुल-कात् ईकन् ।) मूषिकः । इति शब्दरत्नावली ॥

मूषीककर्णी, स्त्री, ( मूषीकस्य कर्णवत् पर्ण-मस्याः ।) मूषिकपर्णी । इति शब्दरत्नावली ॥

मूषीका, स्त्री, (मूषीक+टाप् ।) उन्दुरः । यथा,
"दीना मूषीका मूषा च मूषीका मूषिकेऽपि ।"
इति शब्दरत्नावली ॥

मूष्यायणः, त्रि, ( मोषति अपहरतीति । मूष+कः चौरजारः । तस्यापत्यम् इति । मूष+फक् । बाहुलकात् ह्रस्वाभावः । ) अज्ञात-पितृकः । गूढ़ोत्पन्नः । इति केचित् ॥

मृ, ङ ञ मृतौ । इति कविकल्पद्रुमः ॥ ( तुदा०-आत्म०-अक०-अनिट् ।) मृतिः प्राणत्यागः । ङ ञ म्रियते प्राणी । ङिल्लेऽप्यस्य मृ ङ द्यौटि-मिति नियमेन अन्यत्र परस्मैपदम् । ममार मर्त्ता मरिष्यति अमरिष्यत् । इति दुर्गादासः ॥

मृकण्डकः, पुं, ( मृगस्य कण्डुरिति समासे पृषो-दरादित्वात् गलोपे मृकण्डुः मृकण्ड इति केचि-त्तत्र पठन्ति इत्युज्ज्वलदत्तः । ततः संज्ञायां कन् ।) मृकण्डुमुनिः । इति शब्दरत्नावली ॥

मृकण्डुः, पुं, ( मृगस्य कण्डुरिति समासे पृषोदरा-दित्वात् गलोपः । इत्युज्ज्वलदत्तः । ) मुनि-विशेषः । ( यथा, मार्कण्डेये । ५२ । १६ ।
"प्रागप्येव मृकण्डुश्च पिता मम महायशाः ।")
तस्य पुत्त्रो मार्कण्डेयः । यथा,—
"मार्कण्डेयोऽपि मार्कण्डो मृकण्डुश्च मृक-
ण्डकः ।"
इति शब्दरत्नावली ॥

मृग तृ क ङ मार्गणे । ( चुरा०-आत्म०-सक०-सेट् ।) ङ रामो मृगं मृगयते वनवीथिकासु । इति महानाटकम् । कातन्त्रादौ मृग्य अन्वे-षणे इति दिवादिपरस्मैपदी धातुश्च दृश्यते दुर्गत्रिलोचनयोरसम्मतत्वात् अनेनोपेक्षितः । मृग्यन्तः पदवीं तथाप्यकरुणा बाधा न मुञ्चन्ति माम् । इति तु अकारान्तस्यैव भावे क्विपि अकारलोपे मृगं करोतीति कण्ड्वादित्वात् यकि साध्यम् । इति दुर्गादासः ॥

मृगः, पुं, (मृगयते अन्वेषयति तृणादिकं मृग्यते वा इति । मृग्+इगुपधत्वात् कर्त्तरि च कः ।) पशुमात्रम् । ( यथा, मनुः । ५ । ९ ।
"आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं
विना ।"
मृगशब्दोऽत्र महिषपर्य्युदासात् पशुमात्रपरः । इति तट्टीकायां कुल्लूकः । ) हस्तिविशेषः । गजभेदः । ( यथा, हस्त्यायुर्वेदे ।
"अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा ।")
अन्वेषणम् । ( यथा, साहित्यदर्पणे । ४ । १७ ।
"जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।